वार्षिकः पाठ्यक्रमः
सत्रम् 2018–19
कक्षा – सप्तमी
विषय : संस्कृतम्
(प्रतिभासमूहः)

प्रथमसत्रस्य पाठ्यक्रमः

**आत्मपरिचयः**
❖ मम नाम ................ ।
❖ शिक्षकः छात्रं पृच्छति – भवतः नाम किम्?
❖ छात्रः वदति – मम नाम ............ ।
❖ शिक्षकः छात्रां पृच्छति – भवत्याः नाम किम्?
❖ छात्रा वदति – मम नाम ............. ।
❖ परस्परं छात्राः परिचयं वदन्ति नामानि च पृच्छन्ति।
(अधिगमसम्प्राप्तिः – संस्कृतसंभाषणकौशलवृद्धिः आत्मविश्वासश्च।)

**प्रथमः पाठः – ''सुभाषितानि''**
❖ सस्वरगायनम्, श्लोकार्थज्ञानम्, शब्दार्थज्ञानं, लिङ्गज्ञानम्, अभ्यासकार्यम् च।
❖ प्रत्यक्षपद्धतिद्वारा वस्तुनि प्रदर्श्य साभिनयं परिचयः कारणीयः।
❖ (पाठ्यसामग्री – त्रिषु लिंगेषु वस्तूनां संग्रहः)
❖ नैतिकमूल्यानां निर्देशः।
(अधिगमसम्प्राप्तिः – श्लोकोच्चारणाभ्यासः, सज्जनानां प्रकृतिः, सत्य–दान–विद्या–व्यवहारादीनां महत्त्व–विषये जानन्ति)

**द्वितीयः पाठः – ''दुर्बुद्धिः विनश्यति''।**
❖ आदर्शवाचनम्, अनुवाचनम्, काठिन्यनिवारणं, शब्दार्थज्ञानं, लिङ्गज्ञानं अभ्यासकार्यं च।
❖ नैतिकमूल्यानां निर्देशपूर्वकम् कथाग्रन्थस्य परिचयः
❖ शब्दपरिचयः – किम्, एतत्, तत्–त्रिषु लिङ्गेषु।
❖ क्रियापदपरिचयः – धाव्, खाद्, क्रीड्, पठ्, हस्, वद्, खेल् (लट्लकारे वर्तमानकाले)
❖ संस्कृतभाषायाः प्रचलितशब्दानां धातूनां शब्दरूपाणां व्याकरणस्य अध्यापितयोः पाठयोः च परिचयः।
(अधिगमसम्प्राप्तिः – संस्कृतभाषायाः प्राथमिकज्ञानप्राप्तिः, लघुसंस्कृतवाक्यरचनाभ्यासः, मातृभाषायां प्रयुक्तानां संस्कृतशब्दानां परिचयः।)

| |
|---|
| **तृतीयः पाठः – ''स्वाबलम्बनम्''**<br>❖ आदर्शवाचनम्, अनुवाचनम्, काठिन्यनिवारणं, शब्दार्थज्ञानं, लिङ्गज्ञानं अभ्यासकार्यं च।<br>❖ भारतीयमासानां ऋतूनां च नामानि स्फोरकपत्रे (चार्टपत्रे) लेखनम्।<br>❖ संख्याज्ञानम् (1–50) एकतः पञ्चाशत् पर्यन्तम्।<br>❖ प्रत्ययपरिचयः – क्त्वा तुमुन् ल्यप् च।<br>(अधिगमसम्प्राप्तिः – संख्याज्ञानम्, तत्–एतत् शब्दानां, प्रत्ययानां च ज्ञानं भवति।) |
| **पञ्चमः पाठः – ''पण्डिता रमाबाई''**<br>❖ आदर्शवाचनम्, अनुवाचनम्, काठिन्यनिवारणं, शब्दार्थज्ञानं, लिङ्गज्ञानं अभ्यासकार्यं च।<br>❖ घटनाक्रमलेखनम्, नैतिकमूल्यानां निर्देशः।<br>❖ अव्ययपदानि – उपरि, अधः, उच्चैः, नीचैः, अलम्, कदापि, अन्तः, बहिः, पुनः, कुत्र, कदा, एकदा।<br>❖ लकारपरिवर्तनम् – लट्लकारः–लृट्लकारे। यथा – सः पठति – सः पठिष्यति।<br>❖ पदपरिचयः वाक्यनिर्माणं च।<br>(अधिगमसम्प्राप्तिः – वर्तमानकाले प्रयुक्तस्य वाक्यस्य भविष्यत्काले परिवर्तनस्य ज्ञानम्। भाषिक–क्षमतावृद्धिः।) |
| **अष्टमः पाठः – ''त्रिवर्णः ध्वजः''।**<br>❖ आदर्शवाचनम्, अनुवाचनम्, काठिन्यनिवारणं, शब्दार्थज्ञानं, लिङ्गज्ञानं अभ्यासकार्यं च।<br>❖ आकारान्तस्त्रीलिङ्गपरिचयः।<br>❖ कारकाणाम् उपपदविभक्तीनां च परिचयः।<br>❖ राष्ट्रध्वजविषये पञ्चवाक्यानि संस्कृतभाषायां लेखनीयानि।<br>(अधिगमसम्प्राप्तिः – छात्रेषु नैतिकं, सामाजिकं राष्ट्रीयञ्च मूल्यानां ज्ञानम्। कारकनियमानुसारं वाक्यनिर्माणं प्रयोगं च जानन्ति।) |
| नवमः पाठः – ''अहमपि विद्यालयं गमिष्यामि''।<br>❖ संवादशैल्या पाठस्य आदर्शवचनम्। छात्राः पाठस्य पात्ररूपेण कक्षायां नाट्याभिनयं करिष्यन्ति।<br>❖ शब्दार्थाः, सरलार्थाः, अभ्यासकार्यम् च।<br>❖ भिन्नार्थपदचयनम्, विलोमपर्यायपदचयनम्।<br>(अधिगमसम्प्राप्तिः –मौलिक–अधिकारविषये शिक्षायां जागरूकताविषये च ज्ञानम् भवति। )<br>❖ प्रथमसत्रस्य पाठ्यक्रमस्य पुनरावृत्तिः<br>❖ प्रथमसत्रस्य परीक्षा। |

**(प्रतिभा समूहः)**

द्वितीयसत्रस्य पाठ्यक्रमः

**दशमः पाठः – ''विश्वबन्धुत्वम्''**

❖ आदर्शवाचनम्, अनुवाचनम्, काठिन्यनिवारणं, शब्दार्थज्ञानं, लिङ्गज्ञानं अभ्यासकार्यं च।

❖ नैतिकमूल्यानां निर्देशः।

❖ कारकविभक्तिः (सप्तमी) उपपदविभक्तिः च।

❖ पदस्तरे अभ्यासः।

ग्रामः–ग्रामे, हस्तः–हस्ते, वृक्षः–वृक्षे, माला–मालयाम्, वाटिका–वाटिकायाम्, नदी–नद्याम्, लेखनी–लेखन्याम्, पुस्तकं–पुस्तके, मन्दिरं–मन्दिरे, नेत्रम्–नेत्रे

एवमेव त्रिषु लिङ्गेषु (40) चत्वारिंशत्पदानां लघुस्फोरकपत्रमाध्यमेन प्रथमातः सप्तमी विभक्तौ परिवर्तनाभ्यासः। तदनन्तरं वाक्यस्तरे चत्वारिंशत् वाक्यानां (40) दीर्घस्फोरकपत्रमाध्यमेन अभ्यासः।

कृष्णमन्दिरं मथुरा अस्ति। – कृष्णमन्दिरं मथुरायाम् अस्ति।

जलं नदी अस्ति। – जलं नद्यां अस्ति।

मूर्तिः मन्दिरम् अस्ति। – मूर्तिः मन्दिरे अस्ति।

एवं प्रकारेण रेखांकितस्य पदस्य स्थाने सप्तमीविभक्तिं प्रयुज्य छात्राः वाक्यं पुनः वदन्ति। पुनश्च शिक्षकः सप्तमीविभक्तियुक्तं वाक्यम् उक्त्वा पुनः प्रश्नं करिष्यति। छात्राः उत्तरं वदिष्यन्ति। यथा –

शिक्षकः – वाराणसी उत्तरप्रदेशे अस्ति। वाराणसी कुत्र अस्ति?

छात्रः – वाराणसी उत्तरप्रदेशे अस्ति।

(अधिगमसम्प्राप्तिः – अनेन प्रकारेण छात्राः पदानां सप्तमीविभक्तौ परिवर्तने समर्थाः भवन्ति। पुनश्च प्रश्नोत्तरमाध्यमेन सप्तमीविभक्तेः प्रयोगे निपुणाः भवन्ति।)

**एकादशः पाठः – ''समवायो हि दुर्जयः''**

❖ आदर्शवाचनम्, अनुवाचनम्, काठिन्यनिवारणं, शब्दार्थज्ञानं, लिङ्गज्ञानं अभ्यासकार्यं च।

❖ नैतिकमूल्यानां निर्देशः।

❖ लृट्लकारे – पठ्, गम्, लिख्, हस्, वद्, चल्, खेल्, पत् ........ धातूनां रूपाणां कण्ठस्थीकरणम् अर्थसहितवाक्यप्रयोगज्ञानञ्च।

❖ अभिनयमाध्यमेन लट्लकारस्य लृट्लकारे परिवर्तनाभ्यासश्च। यथा –

एषः बालकः अस्ति। – एषः बालकः वैद्यः भविष्यति।

एषः अंकुरः अस्ति। – अंकुरः शिक्षकः भविष्यति।

एवं प्रकारेण अन्यधातूनां परिवर्तनाभ्यासं कारयित्वा वाक्यनिर्माणाय छात्राः प्रेरणीयाः।

❖ लट्लकारतः लृट्लकारे परिवर्तनाभ्यासः। यथा –

पुस्तकं पठति। – पुस्तकं पठिष्यति।

गृहं गच्छति। – गृहं गमिष्यति।

एवमेव विंशतिवाक्यानाम् अभ्यासः।

(अधिगमसम्प्राप्तिः – वर्तमानकाले क्रियापदानां भविष्यत्काले परिवर्तने समर्थाः भवन्ति।)

**द्वादशः पाठः – ''विद्याधनम्''**

❖ सस्वरगायनम्, अनुवाचनम्, भावार्थबोधनम्, अभ्यासकार्यम्।

❖ नैतिकमूल्यानां निर्देशः। श्लोककण्ठस्थीकरणम्।

❖ त्रिषु लिङ्गेषु वचनेषु च पदपरिचयः।

बालकः – बालकौ – बालकाः। युवकः – युवकौ – युवकाः

लेखनी – लखन्यौ – लेखन्यः। पुस्तकम् – पुस्तके – पुस्तकानि

गायिका – गायिके – गायिकाः। युवती – युवत्यौ – युवत्यः।

फलम् – फले – फलानि। पुस्तकं – पुस्तके – पुस्तकानि।

एवमेव प्रतिलिङ्गं दश–पदानाम् अभ्यासः।

(अधिगमसम्प्राप्तिः – सस्वरगायने छात्राः निपुणाः भवन्ति। त्रिषु लिङ्गेषु शब्दरूपाणि ज्ञात्वा तेषां वाक्यप्रयोगे निपुणाः भवन्ति।)

**त्रयोदशः पाठः – ''अमृतं संस्कृतम्''**

❖ आदर्शवाचनम्, अनुवाचनम्, काठिन्यनिवारणं, शब्दार्थज्ञानं, लिङ्गज्ञानं अभ्यासकार्यं च।

❖ 'संस्कृतभाषायाः महत्त्वम्' इति विषये परिचर्चा।

पाठे प्रदत्तः साहित्यपरिचयः बोधनीयः।

❖ संस्कृतभाषायाः महत्त्वविषये पञ्चवाक्यानि लेखनीयानि।

❖ त्रिषु लकारेषु (लट्–लृट्–लङ्) कृ – पच् – वस् – हस् – खेल् – चर् – धातूनां परिचयः वाक्यप्रयोगश्च।

शिक्षकः त्रिषु पुरुषेषु वचनेषु लकारेषु च धातूनां वाक्यनिर्माणाय निर्देशं कृत्वा अभ्यासं कारयिष्यति।

❖ नदी–वारि–पितृ–मधु–शब्दानां प्रथमाविभक्तौ त्रिषु वचनेषु परिचयः वाक्यप्रयोगश्च। यथा–
बालकः गच्छति। बालकौ गच्छतः। बालकाः गच्छन्ति।

❖ विशेषण गति–मति–नीति इत्यादीनां इकारान्त–स्त्रीलिंग शब्दानां सर्वविभक्तिषु त्रिषु वचनेषु परिचयश्च।

(अधिगमसम्प्राप्तिः – संस्कृतस्य महत्त्वं जानन्ति प्रेरिताः च भवन्ति। त्रिषु लकारेषु धातुरूपाणि ज्ञात्वा वाक्यनिर्माणे समर्थाः भवन्ति। प्रथमाविभक्तौ त्रिषु वचनेषु रूपाणां वाक्ये प्रयोगं कुर्वन्ति। सप्तविभक्तिषु शब्दरूपाणि जानन्ति।)

**चतुर्दशः पाठः – ''अनारिकायाः जिज्ञासा''।**

❖ आदर्शवाचनम्, अनुवाचनम्, काठिन्यनिवारणं, शब्दार्थज्ञानं, लिङ्गज्ञानं अभ्यासकार्यं च।

❖ शिक्षकः कक्षायां छात्रैः सह तस्य जिज्ञासाविषये चर्चां करिष्यति।

❖ पितृ–मातृ–कर्तृ–भ्रातृ–दातृ इत्यादिनां सर्ववचनेषु सर्वविभक्तिषु च अभ्यासः।

❖ चर्–हस्–खेल्–खाद्–दृश्–स्था–पठ्–लिख्–वद् इत्यादीनां धातूनां पञ्चलकारेषु अभ्यासः प्रयोगश्च।

| |
|---|
| (अधिगमसम्प्राप्तिः – छात्राः विविधविषये जिज्ञासां कुर्वन्ति समाधानं च प्राप्नुवन्ति। लकाराणां विभक्तीनां च प्रयोगे निपुणाः भवन्ति।) |
| **पञ्चदशः पाठः – ''लालनगीतम्''**<br>❖ सस्वरगायनम्, श्लोकार्थज्ञानम्, शब्दार्थज्ञानं, लिङ्गज्ञानम्, अभ्यासकार्यम् च।<br>❖ चित्राधारितवाक्यरचनाभ्यासः। यथा – उद्यानम्, क्रीडाक्षेत्रम्, विद्यालयः इत्यादयः।<br>❖ समानार्थकपदानां परिचयः। यथा – पृथ्वी–धरणी<br>❖ युग्मपदानां परिचयः। यथा – शीघ्रम्–मन्दम्, उपरि–अधः, उच्चैः–नीचैः, यदा–तदा, यावत्–तावत्, यदि–तर्हि, यद्यपि–तथापि।<br>(अधिगमसम्प्राप्तिः – छात्राः विविधविषयकं चित्रं वीक्ष्य वाक्यमाध्यमेन वर्णने समर्थाः भवन्ति। शब्दभण्डारे वृद्धिः भवति।) |
| **प्रथमसत्रीयपाठयक्रमस्य द्वितीयसत्रीयपाठ्यक्रमे समावेशः।**<br>❖ प्रथमः पाठः – ''सुभाषितानि''। अभ्यासकार्यम्।<br>❖ द्वितीयः पाठः – ''दुर्बुद्धिः विनश्यति''। अभ्यासकार्यम्।<br>❖ शब्दरूपाणि –<br>पुलिङ्गे – राम, बालक, देव इत्यादयः।<br>स्त्रीलिङ्गे – लता, सीता, गीता, लक्ष्मी, नदी इत्यादयः।<br>नपुंसकलिङ्गे – फल, पुस्तक, मन्दिर इत्यादयः।<br>सर्वनाम शब्दः– किम्, एतत्, तत्। त्रिषु लिङ्गेषु सप्तविभक्तिषु शब्दरूपाणि।<br>**द्वितीयसत्रस्य पाठ्यक्रमस्य पुनरावृत्तिः।**<br>**द्वितीयसत्रस्य परीक्षा।** |